# || महाशास्तुः कवचस्तोत्रम् ||

www.kamakotimandali.com

ॐ अस्य श्रीमहाशास्तृ कवचस्तोत्र महामन्त्रस्य ब्रह्मा ऋषिः गायत्री छन्दः श्रीमहाशास्ता देवता ह्रां बीजं ह्रीं शक्तिः ह्रूं कीलकं श्रीशास्तृ कृपाकटाक्षसिद्ध्यर्थे जपे विनियोगः |

[ह्रां इत्यादि न्यासमाचरेत्]

**ध्यानम्**

तेजोमण्डलमध्यगं त्रिनयनं दिव्याम्बरालङ्कृतं
देवं पुष्पशरेक्षुकार्मुकलसन्माणिक्यपात्राभयान् |
बिभ्राणं करपङ्कजे मदगजस्कन्धाधिरूढं विभुं
शास्तारं शरणं व्रजामि सततं त्रैलोक्यसम्मोहनम् ||

महाशास्ता शिरः पातु फालं हरिहरात्मजः |
कामरूपी दृशौ पातु सर्वज्ञो मे श्रुती सदा ||
घ्राणं पातु कृपाध्यक्षो मुखं गौरीप्रियः सदा |
वेदाध्यायी च मे जिह्वां पातु मे चिबुकं गुरुः ||
कण्ठं पातु विशुद्धात्मा स्कन्धौ पातु सुरार्चितः |
बाहू पातु विरूपाक्षः करौ तु कमलाप्रियः ||
भूताधिपो मे हृदयं मध्यं पातु महाबलः |
नाभिं पातु महावीरः कमलाक्षोऽवतात् कटिम् ||
अपानं पातु विश्वात्मा गुह्यं गुह्यार्थवित्तमः |
ऊरू पातु गजारूढो वज्रधारी च जानुनी ||
जङ्घे पात्वङ्कुशधरः पादौ पातु महामतिः |
सर्वाङ्गं पातु मे नित्यं महामायाविशारदः ||

इतीदं कवचं पुण्यं सर्वाघौघनिकृंतनम् |
महाव्याधिप्रशमनं महापातकनाशनम् ||
ज्ञानवैराग्यदं दिव्यमणिमादिविभूषितम् |

आयुरारोग्यजननं महावश्यकरं परम् ||
यं यं कामयते कामं तं तं प्राप्नोत्यसंशयः |
त्रिसन्ध्यं यः पठेद्विद्वान् स याति परमां गतिम् ||

|| इति शिवम् ||

## || mahāśāstuḥ kavacastotram ||

OM asya śrīmahāśāstṛ kavacastotra mahāmantrasya brahmā ṛṣiḥ gāyatrī chandaḥ śrīmahāśāstā devatā hrāṃ bījaṃ hrīṃ śaktiḥ hrūṃ kīlakaṃ śrīśāstṛ kṛpākaṭākṣasiddhyarthe jape viniyogaḥ |

[hrāṃ ityādi nyāsamācaret]

**dhyānam**

tejomaṇḍalamadhyagaṃ trinayanaṃ divyāmbarālaṅkṛtaṃ
devaṃ puṣpaśarekṣukārmukalasanmāṇikyapātrābhayān |
bibhrāṇaṃ karapaṅkaje madagajaskandhādhirūḍhaṃ vibhuṃ
śāstāraṃ śaraṇaṃ vrajāmi satataṃ trailokyasammohanam ||

mahāśāstā śiraḥ pātu phālaṃ hariharātmajaḥ |
kāmarūpī dṛśau pātu sarvajño me śrutī sadā ||
ghrāṇaṃ pātu kṛpādhyakṣo mukhaṃ gaurīpriyaḥ sadā |
vedādhyāyī ca me jihvāṃ pātu me cibukaṃ guruḥ ||
kaṇṭhaṃ pātu viśuddhātmā skandhau pātu surārcitaḥ |
bāhū pātu virūpākṣaḥ karau tu kamalāpriyaḥ ||
bhūtādhipo me hṛdayaṃ madhyaṃ pātu mahābalaḥ |
nābhiṃ pātu mahāvīraḥ kamalākṣo.avatāt kaṭim ||
apānaṃ pātu viśvātmā guhyaṃ guhyārthavittamaḥ |
ūrū pātu gajārūḍho vajradhārī ca jānunī ||
jaṅghe pātvaṅkuśadharaḥ pādau pātu mahāmatiḥ |
sarvāṅgaṃ pātu me nityaṃ mahāmāyāviśāradaḥ ||

itīdaṃ kavacaṃ puṇyaṃ sarvāghaughanikṛṃtanam |
mahāvyādhipraśamanaṃ mahāpātakanāśanam ||

jñānavairāgyadaṃ divyamaṇimādivibhūṣitam |
āyurārogyajananaṃ mahāvaśyakaraṃ param ||
yaṃ yaṃ kāmayate kāmaṃ taṃ taṃ prāpnotyasaṃśayaḥ |
trisandhyaṃ yaḥ paṭhedvidvān sa yāti paramāṃ gatim ||

|| iti śivam ||

www.kamakotimandali.com